## अपे च लषः । (१४४/३१२४)

'लष कान्तौ' (धा.पा.८८९), अस्माद् धातोः [1]अप उपपदे, [2]चकाराद् वौ च घिनुण्[3] भवति। अपलाषी । [4]विलाषी ॥

## प्रे लपसृद्रुमथवदवसः । (१४५/३१२५)

प्रे उपपदे [5]लपादिभ्यः घिनुण्[6] भवति । प्रलापी । [7]प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी । [8]वसः इति 'वस निवासे' (धा. पा. १००६) इत्यस्य ग्रहणं नाच्छादनार्थस्य, [9]लुग्विकरणत्वात् ॥

## निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् । (१४६/३१२६)

निन्दादिभ्यो धातुभ्यः[10]तच्छीलादिषु कर्तृषु वुञ् प्रत्ययो भवति । पञ्चम्यर्थे प्रथमा । '[11]क्लिश उपतापे' (धा. पा. ११६२), 'क्लिशू विबाधने' (धा. पा. १५२३) । द्वयोरपि ग्रहणम् । निन्दकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । [12]परिक्षेपकः । परिराटकः । परिवादकः । व्याभाषकः । [13]असूयकः । [14]ण्वुलैव सिद्धे वुञ्विधानं [15]ज्ञापनार्थं, [16]ताच्छीलिकेषु[17]वाऽसरूपन्यायेन [18]तृजादयो न भवन्ति इति (म. भा. २. १३३) ॥

## देविक्रुशोश्चोपसर्गे । (१४७/३१२७)

देवयतेः क्रुशेश्च उपसर्गे उपपदे[19] वुञ् प्रत्ययो भवति। आदेवकः । [20]परिदेवकः । [21]आक्रोशकः । परिक्रोशकः । उपसर्गे इति किम् ? देवयिता । क्रोष्टा[22] ॥

## चलनशब्दार्थादकर्मकाद् युच् । (१४८/३१२८)

चलनार्थेभ्यः शब्दार्थेभ्यश्च [23]अकर्मकेभ्यो धातुभ्यस्त[24]च्छीलादिषु कर्तृषु युच् प्रत्ययो भवति । चलनः । [25]चोपनः । शब्दार्थेभ्यः – शब्दनः । [26]रवणः । अकर्मकात् इति किम् ? पठिता विद्याम् ॥

## अनुदात्तेतश्च हलादेः । (१४९/३१२९)

अनुदात्तेद् यो धातुः हलादिरकर्मकः[27], [28]ततश्च युच् प्रत्ययो भवति । वर्तनः । वर्धनः । अनुदात्तेतः इति किम् ? भविता । हलादेः इति किम् ? एधिता । आदिग्रहणं किम् ? जुगुप्सनः । मीमांसनः । अकर्मकात् [29]इत्येव, वसिता वस्त्रम् ॥

---

1. अपशब्दे फ, अपशब्दादौ अ. क. 2. तच्छीलादिषु कर्तृषु इत्यधिकम् ब. फ. ड. 3. प्रत्ययो इत्यधिकम् ब. ग. ड. ह. 4. अविलाषी अ. 5. लषादिभ्यः धातुभ्यः अ. ब. क. ड, तच्छीलादिषु कर्तृषु इत्यधिकम् ब. फ. 6. प्रत्ययो इत्यधिकम् अ. ग. 7. प्रस्नापी, प्रस्ताती फ. 8. वस इति नास्ति क. ह. 9. तस्य इत्यधिकम् ग. 10. तच्छीलादिषु नास्ति फ. 11. क्लिशु ड, क्लिश विवासने ह. 12. परिक्षेपकः नास्ति ब. 13. आसूयकः ह. 14. निन्दादिभ्यः धातुभ्यः इत्यधिकम् फ. 15. ज्ञापकं अ. क. फ. 16. तच्छीलादिषु अ. 17. वासरूपेण फ. 18. तृनादयः ड. 19. तच्छीलादिषु कर्तृषु इत्यधिकम् अ. ब. क. ह, तच्छीलादिषु फ. 20. प्रदेवयितुं शीलमस्य इत्यधिकम् क. 21. व्याक्रोशकः ड. 22. तृनेव इत्यधिकम् ड. 23. अकर्मकेभ्यः नास्ति फ. 24. तच्छीलेषु फ. 25. कम्पनः अ. 26. कवनः अ. 27. अकर्मकः नास्ति ब. ह. 28. तस्मात् फ. ह, तच्छीलादिषु कर्तृषु इत्यधिकम् अ. ब. क. फ. ह. 29. इति किम् फ.